# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय २७

कैलासं लङ्घयित्वाथ दशग्रीवः सराक्षसः ।
आससाद महातेजा इन्द्रलोकं निशाचरः ॥ १॥

तस्य राक्षससैन्यस्य समन्तादुपयास्यतः ।
देवलोकं ययौ शब्दो भिद्यमानार्णवोपमः ॥ २॥

श्रुता तु रावणं प्राप्तमिन्द्रः सञ्चलितासनः ।
अब्रवीत्तत्र तान्देवान्सर्वानेव समागतान् ॥ ३॥

आदित्यान्सवसून्रुद्रान्विश्वान्साध्यान्मरुद्गणान् ।
सज्जीभवत युद्धार्थं रावणस्य दुरात्मनः ॥ ४॥

एवमुक्तास्तु शक्रेण देवाः शक्रसमा युधि ।
संनह्यन्त महासत्त्वा युद्धश्रद्धासमन्विताः ॥ ५॥

स तु दीनः परित्रस्तो महेन्द्रो रावणं प्रति ।
विष्णोः समीपमागत्य वाक्यमेतदुवाच ह ॥ ६॥

विष्णो कथं करिष्यामो महावीर्यपराक्रम ।
असु हि बलवान्रक्षो युद्धार्थमभिवर्तते ॥ ७॥

वरप्रदानाद्बलवान्न खल्वन्येन हेतुना ।
तच्च सत्यं हि कर्तव्यं वाक्यं देव प्रजापतेः ॥ ८॥

तद्यथा नमुचिर्वृत्रो बलिर्नरकशम्बरौ ।
त्वन्मतं समवष्टभ्य यथा दग्धास्तथा कुरु ॥ ९॥

न ह्यन्यो देव देवानामापत्सु सुमहाबल ।
गतिः परायणं वास्ति त्वामृते पुरुषोत्तम ॥ १०॥

त्वं हि नारायणः श्रीमान्पद्मनाभः सनातनः ।
त्वयाहं स्थापितश्चैव देवराज्ये सनातने ॥ ११॥

तदाख्याहि यथातत्त्वं देवदेव मम स्वयम् ।
असिचक्रसहायस्त्वं युध्यसे संयुगे रिपुम् ॥ १२॥

एवमुक्तः स शक्रेण देवो नारायणः प्रभुः ।
अब्रवीन्न परित्रासः कार्यस्ते श्रूयतां च मे ॥ १३॥

न तावदेष दुर्वृत्तः शक्यो दैवतदानवैः ।
हन्तुं युधि समासाद्य वरदानेन दुर्जयः ॥ १४॥

सर्वथा तु महत्कर्म करिष्यति बलोत्कटः ।
रक्षः पुत्रसहायोऽसौ दृष्टमेतन्निसर्गतः ॥ १५॥

ब्रवीषि यत्तु मां शक्र संयुगे योत्स्यसीति ह ।
नैवाहं प्रतियोत्स्ये तं रावणं राक्षसाधिपम् ॥ १६॥

अनिहत्य रिपुं विष्णुर्न हि प्रतिनिवर्तते ।
दुर्लभश्चैष कामोऽद्य वरमासाद्य राक्षसे ॥ १७॥

प्रतिजानामि देवेन्द्र त्वत्समीपं शतक्रतो ।
राक्षसस्याहमेवास्य भविता मृत्युकारणम् ॥ १८॥

अहमेनं वधिष्यामि रावणं ससुतं युधि ।
देवतास्तोषयिष्यामि ज्ञात्वा कालमुपस्थितम् ॥ १९॥

एतस्मिन्नन्तरे नादः शुश्रुवे रजनीक्षये ।
तस्य रावणसैन्यस्य प्रयुद्धस्य समन्ततः ॥ २०॥

अथ युद्धं समभवद्देवराक्षसयोस्तदा ।
घोरं तुमुलनिर्ह्रादं नानाप्रहरणायुधम् ॥ २१॥

एतस्मिन्नन्तरे शूरा राक्षसा घोरदर्शनाः ।
युद्धार्थमभ्यधावन्त सचिवा रावणाज्ञया ॥ २२॥

मारीचश्च प्रहस्तश्च महापार्श्वमहोदरौ ।
अकम्पनो निकुम्भश्च शुकः सारण एव च ॥ २३॥

संह्रादिर्धूमकेतुश्च महादंष्ट्रो महामुखः ।
जम्बुमाली महामाली विरूपाक्षश्च राक्षसः ॥ २४॥

एतैः सर्वैर्महावीर्यैर्वृतो राक्षसपुङ्गव ।
रावणस्यार्यकः सैन्यं सुमाली प्रविवेश ह ॥ २५॥

स हि देवगणान्सर्वान्नानाप्रहरणैः शितैः ।

विध्वंसयति सङ्क्रुद्धः सह तैः क्षणदाचरैः ॥ २६ ॥

एतस्मिन्नन्तरे शूरो वसूनामष्टमो वसुः ।
सावित्र इति विख्यातः प्रविवेश महारणम् ॥ २७ ॥

ततो युद्धं समभवत्सुराणां राक्षसैः सह ।
क्रुद्धानां रक्षसां कीर्तिं समरेष्वनिवर्तिनाम् ॥ २८ ॥

ततस्ते राक्षसाः शूरा देवांस्तान्समरे स्थितान् ।
नानाप्रहरणैर्घोरैर्जघ्नुः शतसहस्रशः ॥ २९ ॥

सुरास्तु राक्षसान्घोरान्महावीर्यान्स्वतेजसा ।
समरे विविधैः शस्त्रैरनयन्यमसादनम् ॥ ३० ॥

एतस्मिन्नन्तरे शूरः सुमाली नाम राक्षसः ।
नानाप्रहरणैः क्रुद्धो रणमेवाभ्यवर्तत ॥ ३१ ॥

देवानां तद्बलं सर्वं नानाप्रहरणैः शितैः ।
विध्वंसयति सङ्क्रुद्धो वायुर्जलधरानिव ॥ ३२ ॥

ते महाबाणवर्षैश्च शूलैः प्रासैश्च दारुणैः ।
पीड्यमानाः सुराः सर्वे न व्यतिष्ठन्समाहिताः ॥ ३३ ॥

ततो विद्राव्यमाणेषु त्रिदशेषु सुमालिना ।
वसूनामष्टमो देवः सावित्रो व्यवतिष्ठत ॥ ३४ ॥

संवृतः स्वैरनीकैस्तु प्रहरन्तं निशाचरम् ।
विक्रमेण महातेजा वारयामास संयुगे ॥ ३५ ॥

सुमतयोस्तयोरासीद्युद्धं लोके सुदारुणम् ।
सुमालिनो वसोश्चैव समरेष्वनिवर्तिनोः ॥ ३६ ॥

ततस्तस्य महाबाणैर्वसुना सुमहात्मना ।
महान्स पन्नगरथः क्षणेन विनिपातितः ॥ ३७ ॥

हत्वा तु संयुगे तस्य रथं बाणशतैः शितैः ।
गदां तस्य वधार्थाय वसुर्जग्राह पाणिना ॥ ३८ ॥

तां प्रदीप्तां प्रगृह्याशु कालदण्डनिभां शुभाम् ।
तस्य मूर्धनि सावित्रः सुमालेर्विनिपातयत् ॥ ३९ ॥

तस्य मूर्धनि सोल्काभा पतन्ती च तदा बभौ ।
सहस्राक्षसमुत्सृष्टा गिराविव महाशनिः ॥ ४० ॥

तस्य नैवास्थि कायो वा न मांसं ददृशे तदा ।
गदया भस्मसाङ्कृतो रणे तस्मिन्निपातितः ॥ ४१ ॥

तं दृष्ट्वा निहतं सङ्ख्ये राक्षसास्ते समन्ततः ।
दुद्रुवुः सहिताः सर्वे क्रोशमाना महास्वनम् ॥ ४२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com